

# अभ्यासः

**1. उच्चारणं कुरुत-**

| | | |
|---|---|---|
| फुल्लोत्पलम् | अवलम्ब्य | पक्त्वा |
| कम्बुग्रीवः | आवाभ्याम् | भक्षयिष्यामि |
| उक्तवान् | ह्रदम् | सुहृदाम् |
| भवद्भ्याम् | उड्डीयते | भ्रष्टः |

**2. एकपदेन उत्तरत-**

(क) कूर्मस्य किं नाम आसीत्? कम्बुग्रीवः।

(ख) सरस्तीरे के आगच्छन्? धीवराः।

(ग) कूर्मः केन मार्गेण अन्यत्र गन्तुम् इच्छति? आकाशमार्गेण।

(घ) लम्बमानं कूर्मं दृष्ट्वा के अधावन्? गोपालकाः।

**3. अधोलिखितवाक्यानि कः कं प्रति कथयति इति लिखत-**

| | कः कथयति | कं प्रति कथयति |
|---|---|---|
| यथा- प्रातः यद् उचितं तत्कर्त्तव्यम्। | हंसौ | कूर्मं प्रति |
| (क) अहं भवद्भ्यां सह आकाशमार्गेण गन्तुम् इच्छामि। | कूर्मः | हंसौ |
| (ख) अत्र कः उपायः? | हंसौ | कूर्मम् |
| (ग) अहम् उत्तरं न दास्यामि। | कूर्मः | हंसौ |
| (घ) यूयं भस्म खादत। | कूर्मः | गोपालकान् |

८ **मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

| | | | | |
|---|---|---|---|---|
| जलाशयम् | अचिन्तयत् | वृद्धः | दुःखिताः | कोटरे |
| वृक्षस्य | सर्पः | आदाय | समीपे | |

एकस्य वृक्षस्य शाखासु अनेके काकाः वसन्ति स्म। तस्य वृक्षस्य कोटरे एकः सर्पः अपि अवसत्। काकानाम् अनुपस्थितौ सर्पः काकानां शिशून् खादति स्म। काकाः दुःखिताः आसन्। तेषु एकः वृद्धः काकः उपायम् अचिन्तयत्। वृक्षस्य समीपे जलाशयः आसीत्। तत्र एका राजकुमारी स्नातुं जलाशयम् आगच्छति स्म। शिलायां स्थितं तस्याः आभरणम् आदाय एकः काकः वृक्षस्य उपरि अस्थापयत्। राजसेवकाः काकम् अनुसृत्य वृक्षस्य समीपम् अगच्छन्। तत्र ते तं सर्पं च अमारयन्। अतः एवोक्तम्-उपायेन सर्वं सिद्ध्यति।

## ध्यातव्यम्



इयं कथा 'पञ्चतन्त्रम्' इति ग्रन्थात् सम्पादितं कृत्वा उद्धृता। पञ्चतन्त्रस्य लेखकः विष्णुशर्मा। पञ्चानां तन्त्राणां समाहारः पञ्चतन्त्रम् इति। अतः पञ्चतन्त्रस्य पञ्च भागाः सन्ति-मित्रभेदः, मित्रलाभः, सन्धिविग्रहः, लब्धप्रणाशः अपरीक्षित-कारकञ्च।

अस्मिन् पाठे अनवसरे भाषणेन कथं सर्वनाशः भवतीति दर्शितम्। क्वचित् मौनं कार्यसाधकं भवति। यथोक्तम्-

विभूषणं मौनमपण्डितानाम्।
मूर्खो हि शोभते तावत् यावत् किञ्चिन्न भाषते।

4. **मञ्जूषातः क्रियापदं चित्वा वाक्यानि पूरयत-**

| अभिनन्दति | भक्षयिष्यामः | इच्छामि | वदिष्यामि | उड्डीयते | प्रतिवसति स्म |
|---|---|---|---|---|---|

(क) हंसाभ्यां सह कूर्मोऽपि उड्डीयते।

(ख) अहं किञ्चिदपि न वदिष्यामि।

(ग) यः हितकामानां सुहृदां वाक्यं न अभिनन्दति।

(घ) एकः कूर्मः अपि तत्रैव प्रतिवसति स्म।

(ङ) अहम् आकाशमार्गेण अन्यत्र गन्तुम् इच्छामि।

(च) वयं गृहं नीत्वा कूर्मं भक्षयिष्यामः।

5. **पूर्णवाक्येन उत्तरत-**

(क) कच्छपः कुत्र गन्तुम् इच्छति? कच्छपः अन्यत्र गन्तुम् इच्छति।

(ख) कच्छपः कम् उपायं वदति? सः अवदत् - अहं युवयोः पक्षबलेन अन्यत्र गमिष्यामि।

(ग) लम्बमानं कूर्मं दृष्ट्वा पौराः किम् अवदन्?
ग. तं दृष्ट्वा गोपालकाः अवदन् 'हंसाभ्याम् सह कच्छपः उड्डीयते।

(घ) कूर्मः मित्रयोः वचनं विस्मृत्य किम् अवदत्?
(घ) कूर्मः अवदत् - यूयं भस्म खादत।

6. **घटनाक्रमानुसारं वाक्यानि लिखत-**

5 (क) कूर्मः हंसयोः सहायतया आकाशमार्गेण अगच्छत्।

7 (ख) पौराः अकथयन्-वयं पतितं कूर्मं खादिष्यामः।

1 (ग) कूर्मः हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

2 (घ) केचित् धीवराः सरस्तीरे आगच्छन्।

4 (ङ) कूर्मः अन्यत्र गन्तुम् इच्छति स्म।

8 (च) लम्बमानं कूर्मं दृष्ट्वा पौराः अधावन्।

6 (छ) कूर्मः आकाशात् पतितः पौरैः मारितश्च।

3 (ज) 'वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः' इति धीवराः अकथयन्।